# Vyasakritam Shivasantatapujanavarnanam

# વ્યાસકૃતં શિવસન્તતપૂજનવર્ણનમ્

## Document Information

Text title : Vyasakritam Shivasantatapujanavarnanam

File name : shivasantatapUjanavarNanaMvyAsakRRitam.itx

Category : shiva, pUjA, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 49| 101-115||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# વ્યાસકૃતં શિવસન્તતપૂજનવર્ણનમ્

અવિચ્છિન્ના નીરધારા શિવલિઙ્ગે મનોહરા ।
કલ્પનીયા સૈવ ધારા શિવસન્તતપૂજનમ્ ॥ ૧॥

શિવસન્તતપૂજાયાઃ ફલમપ્યુચ્યતે શ‍ૃણુ ।
યસ્ય શ્રવણમાત્રેણ તસ્ય ભક્તિઃ પ્રજાયતે ॥ ૨॥

જલધારા મુક્તિધારા પાપધારાપહારિણી ।
ધારારૂપાણિ પાપાનિ નશ્યન્તિ જલધારયા ॥ ૩॥

અવિચ્છિન્નાનિ પાપાનિ જલાવિચ્છિન્નધારયા ।
વિનશ્યન્તીતિ સા લિઙ્ગે કલ્પનીયા સદા દ્વિજૈઃ ॥ ૪॥

ધર્મકાલે વિશેષેણ જલધારાપ્રકલ્પનમ્ ।
શિવલિઙ્ગેષુ કર્તવ્યં તેન પાપલયો ભવેત્ ॥ ૫॥

અતઃ પાપલયોદ્યોગઃ કર્તવ્યો નીરધારયા ।
શોધિતં નીરમાદાય સુગન્ધદ્રવ્યસંયુતમ્ ॥ ૬॥

પત્રૈઃ ફલૈર્વા પુષ્પૈર્વા નવદુર્ગાઙ્કુરૈરપિ ।
જલૈરપિ પ્રકુર્વન્તિ મુનયઃ શિવપૂજનમ્ ॥ ૭॥

જલં દત્વા મહેશાય યત્ફલં સમવાપ્યતે ।
તત્ફલં કેન વા સમ્યગ્વર્ણનીયં નૃપોત્તમ ॥ ૮॥

શિવાર્ચનેન સિદ્ધ્યન્તિ સર્વે કામાઃ શ્રુતિશ્રુતાઃ ।
અનાયાસેન મર્ત્યાનાં શુભદં શિવપૂજનમ્ ॥ ૯॥

અપારકરુણાસારસાગરઃ શઙ્કરઃ પરઃ ।
ભક્ત્યા દત્તં ફલં પત્રં ગૃહ્ણાતિ શુભદાયકઃ ॥ ૧૦॥

તસ્ય સમ્પૂર્ણકામસ્ય નિત્યાનન્દસ્ય વસ્તુતઃ ।
તોષો જલાર્પણેનાપિ જાયતે તત્ કિલાદ્ભુતમ્ ॥ ૧૧॥

પ્રચ્છિન્નાન્યપિ શુષ્કાણિ બિલ્વપત્રાણિ શઙ્કરઃ ।
ગૃહ્ણાતિ વિપુલં ભાગ્યં દત્વા ભક્તાય સાદરમ્ ॥ ૧૨॥

શિવસ્ય કરુણાસિન્ધોર્મહિમાપિ મહાન્ ખલુ ।
સ્વભક્તદયયા ગૃહ્ણાત્યમ્બુ પત્રં ચ કિઞ્ચન ॥ ૧૩॥

નારાધયન્તિ સહસા કરુણાસાગરં હરમ્ ।
ન તરત્યપિ સંસારસાગરં પાતકાકરમ્ ॥ ૧૪॥

ભક્ત્યા દેવશિરોમણિઃ સુરમણિર્દ્રિત્રાણિ પત્રાણિ વા
    નીરં વા કુસુમં ફલં મણિમયે લિઙ્ગેઽન્યલિઙ્ગેઽપિ વા ।
દત્તં ભસ્મવિભૂષિતેન કૃપયા ગૃહ્ણાત્યનુગ્રાહકો
    દાતૃત્વવ્યસનાત્ પ્રયચ્છતિ મહત્ ભાગ્યં ભવાનીપતિઃ ॥ ૧૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વ્યાસકૃતં શિવસન્તતપૂજનવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૪૯। ૧૦૧-૧૧૫॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 49. 101-115..

Proofread by Ruma Dewan

---

*Vyasakritam Shivasantatapujanavarnanam*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*